# कथा -1

## बुद्धिमान् शिष्यः

काशीनगरे एकः पण्डितः वसति। पण्डितसमीपम् एकः शिष्यः आगच्छति।
शिष्यः वदति - “आचार्य ! विद्याब्यासार्थम् अहम् आगतः।

पण्डितः शिष्यबुद्धिपरीक्षार्थम् पृच्छति - “वत्स ! देवः कुत्र अस्ति ?”
शिष्यः वदति - “गुरो ! देवः कुत्र नास्ति ? कृपया भवान् एव समाधानं वदतु”।

संतुष्टः गुरुः वदति - “देवः सर्वत्र अस्ति। देवः सर्वव्यापि। त्वं बुद्धिमान्।
अतः विद्याब्यासार्थम् अत्रेव वस।

# कथा -2

एक: वृद्ध: अस्ति। सः क्षुधितः भवति। समीपे एक: अम्रवृक्षः अस्ति। वृद्ध: अम्रवृक्षस्य समीपम् गच्छति। वृक्षे बहूनि फलानि पश्यति। सः चिन्तयति -”अहं वृद्ध:। मम शरीरे शक्तिः नास्ति। वृक्षः उन्नतः अस्ति। कथम् उपरि गच्छामि ? कथं फलं प्राप्नोमि ? इति। वृक्षस्य उपरि वानराः सन्ति। वृद्ध: एकं उपायम् करोति। सः पाषानखण्डान् स्वीकृत्य क्षिपति । वानराः कुपिताः भवन्ति। ते फलानि क्षिपन्ति। वृद्ध: तानि फलानि स्वीकृत्य सन्तोषेण खादति ।